**श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्**

**सत्रान्तपरीक्षा नवम्बर / दिसम्बर् - २०१६**

कक्षा- आचार्यः - २ (Sem – 3) **प्रश्नपत्रम् - ५** गुणाः - ७०

विषयः – वेदः (ऐच्छिक) **कोड – C.E – 5.3.3** समयः- ११:०० तः २:००

सन्दर्भग्रन्थः – ऋग्वेदभाष्यभूमिका (सायणकृता)

दिनाङ्कः – २९-११-२०१६

---

प्रथमान्वितिः (युनिट - १)

**प्रश्नः १ अधोलिखितयोरप्येकमेव सूत्रं व्याख्यायताम् ।** (४)

(क)तदर्थशास्त्रात् (ख) अचेतनेऽर्थबन्धनात् ।

**प्रश्नः २ अधोलिखितयोः प्रश्नयोः एक एव समाधेयः ।** (१२)

(क)ऋग्वेदभाष्यभूमिकानुसारं ऋवेदस्याभ्यर्हितत्वं विवेचनीयम् ।

(ख)वैदिकमन्त्रेषु अर्थविवक्षां विद्यते न वा ग्रन्थोक्तदिशा प्रतिपादयत ।

**प्रश्नः ३ अधः स्थितेषु द्वयोरेव भावार्थो लेख्यः ।** (४)

(क)बुद्धशास्त्रात्।

(ख)गुणार्थेन पुनःश्रुतिः।

(ग)स्वाध्यायवदवचनात्

द्वितीयान्वितिः (युनिट - २)

**प्रश्नः ४ एकस्य उत्तरं लिखत ।** (१२)

(क)ऋग्वेदभाष्यानुसारं ब्राह्मणभागस्य प्रामाण्यमुपपादयत ।

(ख) अर्थवादस्य प्रामाण्यमधीतशास्त्रालोके विश्लेषयत।

**प्रश्नः ५ द्वयोरेकस्य ग्रन्थानुसारं व्याख्या विधेया ।** (४)

(क) अभिधानेऽर्थवादः ।

(ख) तुल्यं च साम्प्रदायिकम् ।

**प्रश्नः ६ द्वयोरेव भावो लेखनीयः ।** (४)

(क) विद्यावचनसंयोगात् ।

(ख)विधिशब्दाच्च ।

(ग)शास्त्रदृष्टिविरोधाच्च ।

तृतीयान्वितिः (युनिट - ३)

**प्रश्नः ७ यथाशास्त्रं द्वयोरेकस्य व्याख्यां कुरुत ।** (४)

(१) ऋषयोऽपि पदार्थानां नान्तं यान्ति पृथक्त्वशः ।
लक्षणेन तु सिद्धानामन्तं यान्ति विपश्चितः ॥

(२) नर्क्सामयजुषां लक्ष्म साङ्कर्यादिति शङ्किते ।
पादश्च गीतिः प्रश्लिष्टपाठ इत्यस्त्यसङ्करः ॥

**प्रश्नः ८ अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्यैव समाधानं विधीयताम्।** (८)

(क)स्वाध्याये दृष्टादृष्टफलयोः पूर्वपक्षं सिद्धान्तपक्षञ्च प्रतिपादयत।

(ख)ग्रन्थोक्तरीत्या वेदस्यानुबन्धचतुष्टयं विवेचयत ।

**प्रश्नः ९ प्रदत्तेषु केषाञ्चन त्रयाणां पदानां भावान् लिखत ।** (३)

(क)गीतिषु सामाख्या (ख) दृष्टौ प्राप्तिसंस्कारौ (ग) लोकवन्नैजोबोधः

(घ) धर्मब्रह्मणी वेदैकवेद्ये (ङ) सर्वे देवाः वेदविद्ब्राह्मणे वसन्ति ।

चतुर्थान्वितिः (युनिट – ४)

**प्रश्नः १० अधोलिखितयोः एकस्य परिचयो देयः ।** (८)

(क) कल्पशास्त्रम् ।

(ख) छन्दःशास्त्रम् ।

**प्रश्नः ११ अधोलिखितयोरेकस्यैव व्याख्या विधीयताम् ।** (४)

(क) त्रिषष्टिश्चतुःषष्टिर्वा वर्णाःशम्भुमतेमताः।
प्राकृतेसंस्कृते चापि स्वयं प्रोक्ताः स्वयम्भुवा ॥

(ख) यदधीतमविज्ञातं निगदेनैव शब्द्यते ।
अनग्नाविव शुष्कैन्धो न तज्ज्वलति कर्हिचित् ॥

**प्रश्नः १२ अधोलिखितेषु त्रयाणां लघूत्तरं लिखत ।** (३)

(क) कति विद्याः सन्ति ?

(ख) काभ्यां वेदं समुपबृंहयेत् ?

(ग) पुराणस्य कति लक्षणानि, कानि च तानि ?

(घ) किं श्रोत्रमुच्यते ?

(ङ) वर्णानां कति स्थानानि ?

*****